**संस्कृत-वार्ता:**

**दिनाङ्क :- 23.02.2026** **प्रात: - 06:55**

**<u>अथ वार्ताः</u>**

**<u>एम-मेरठः</u>**

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः उत्तरप्रदेशस्य मेरठ-नगरस्य शताब्दी-नगर-नमोभारत-मेट्रो-स्थानके मेरठ-मेट्रो, नमोभारत-रेल-यानस्य च ध्वजप्रदर्शनपूर्वकम् उद्घाटनं कृतम्। प्रधानमन्त्रिणा द्व्यशीतिः कि. मी. परिमितं देहली-मेरठ-नमोभारत-मार्गम् राष्ट्राय समर्पितम्। नमोभारत रीजनल रैपिड् ट्रान्जिट् सिस्टम् इति अशीत्यधिकैकशतं कि. मी. प्रतिहोरायाः गत्या नमोभारत् इति भारतस्य प्रथमा क्षेत्रीय-द्रुतपरिवहन-व्यवस्था अस्ति, या साहिबाबाद्, गाजियाबाद्, मोदीनगर्, मेरठ इत्यादीनि प्रमुख-नगरकेन्द्राणि दिल्ली-नगरेण सह द्रुतगत्या संयोजयति। अनेनैव सह प्रधानमन्त्री मोदी मेरठ-नगरे प्रायः त्रयोदशसहस्र- कोटिरूप्यकाणां विविधविकासपरियोजनानां उद्घाटनम्, राष्ट्रार्पणञ्च कृतवान्। जनसमूहं सम्बोधयन् प्रधानमन्त्री मोदी अवदत् यत् उद्घाटिताः परियोजनाः विकसित-उत्तरप्रदेशं, विकसितभारतं च प्रणोदयन्तीति।

श्रीमोदीः अवदत् यत्, उत्तरप्रदेशः विश्वस्तरीयस्य मूलसौकर्ययुतस्य नवयुगस्य साक्षी अस्तीति।

**<u>प्रधानमन्त्री मन की बात</u>**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अभिमानं प्रकटितं यत् इण्डिया-ए. आई. इम्पैक्ट-सम्मिटाख्यं सम्मेलनं भविष्ये विश्वं ए. आई. इत्यस्य शक्तिं कथं उपयोक्तुं शक्नोति इत्यस्य पथ-परिवर्तन-बिन्दुः इति सिद्धम् अस्ति। आकाशवाण्यां स्वस्य मन की बात इत्यस्मिन् कार्यक्रमे राष्ट्रम् अभिसंबोधयन् प्रधानमन्त्री अवदत् यत् ए. आई. इम्पैक्ट् समिट् इत्यस्मिन् नवदेहली-नगरस्य भारतमण्डपे अनेकदेशानाम् नेतारः, उद्योगप्रमुखाः, आविष्कर्तारः, स्टार्ट्-अप इति क्षेत्रेण सम्बद्धजनाश्च मिलितवन्तः। तेनोक्तं अद्य राष्ट्रपतिभवने राजाजी-उत्सवः आचर्यते। अस्मिन् अवसरे राष्ट्रपतिभवनस्य केन्द्रीय-प्राङ्गणे ब्रिटिश्-वास्तुकारस्य एड्विन् लुट्यन्स् इत्यस्य प्रतिमायाः स्थाने स्वतन्त्रभारतस्य प्रथमः भारतीय-गवर्नर्-जनरल् सी. राजगोपालाचारी इत्यस्य प्रतिमा स्थापयिष्यते इति।

**<u>प्रधानमन्त्री मोदी-नेतन्याहु -</u>**

इज्रायल-देशेन सह विश्वासेन, नवान्वेषणेन, शान्त्या च संयुक्तप्रतिबद्धतायाः आधारेण निर्मिता चिरस्थायी-मैत्री भारताय महत्वधायी अस्तीति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। इस्रयेल्-देशस्य प्रधानमन्त्रिणः

बेञ्जामिन् नेतन्याहु-वर्यस्य सामाजिक-माध्यमे प्रसारितसन्देशस्य प्रतिक्रियारूपेण श्रीमोदी अवदत् यत् सः भारत-इस्रायल-देशयोर्मध्ये दृढबन्धस्य विषये अपि च उभयदेशयोः मध्ये द्वैपाक्षिक-सम्बन्धस्य विविध-स्वरूपस्य विषये अपि सहमतिः प्रकटिताऽस्ति इति।

**विदेश मन्त्रालयः**

अफ्गानिस्तान्-देशस्य भूभागे पाकिस्तानस्य वायु-आक्रमणस्य भारतं दृढतया निन्दाम् अकरोत्, यस्य परिणामेन पवित्र-रमजान-मासे महिलाभिः बालैश्च सह नागरिकाणां क्षतिः अभवत्। अस्मिन् विषये प्रसारमाध्यमानां प्रश्नस्य प्रत्युत्तरे विदेशमन्त्रालयस्य प्रवक्ता रणधीर जैसवालः अवदत् यत्, पाकिस्तानस्य आन्तरिक-विफलतानां बाह्यरूपेण एषः अन्यः प्रयासः अस्तीति।

**जयन्तचौधरी-प्रतियोगिताः**

कौशलविकासस्य उद्यमशीलतायाः च राज्यमन्त्री जयंत चौधरी स्किल् इण्डिया डिजिटल् हब् इति माध्यमेन भारतस्य डिजिटल् स्किलिङ्ग्-आन्दोलनस्य गतिं वर्धयितुं बढ़ना है तो यहां जुड़ना है इति नाम्ना राष्ट्रव्यापीम् अभियानम् आरभत।

**टी-20 विश्वक  क्रिकेटः**

आई. सी. सी. इत्यस्य पुरुषाणां टी-20 क्रिकेट्-विश्वकप इति क्रीडायां गतरात्रौ अहमदाबाद-नगरस्य नरेन्द्र मोदी-क्रीडाङ्गणे सुपर्-8 इति अनन्तिम क्रीडाचक्रे दक्षिण-आफ्रिका-देशस्य विरुद्धं भारतं षड्सप्ततिः धावनाङ्कैः पराजितम्।

॥ **इति वार्ताः**॥